**दिनाङ्कः 25.06.2026**

**प्रातः - 06:55**

**अथ वार्ताः**

**पीएम – प्रगति**

प्रधानमन्त्री नरेन्द्रमोदी ह्यः नवदेहल्याः 'सेवा तीर्थ' स्थले 'प्रगति' इति सूचना-सञ्चार-प्रौद्योगिकी-आधारित-मञ्चस्य द्विपंचाशत् तमोपवेशनस्य अध्यक्षतां विहितवान्।

अस्यां गोष्ठ्याम्, श्रीमोदी चतुर्षु राज्येषु विस्तृतान् मार्ग-विद्युत्-औद्योगिकवीथी तथा मेट्रो-रेल्वे-क्षेत्राणां चतुरः प्रमुखान् आधारभूत-संरचना-प्रकल्पान् समीक्षितवान्। एतेषां प्रकल्पानाम् आहत्य व्ययः प्रायः त्रिंशत् सहस्रकोटि-रूप्यकाणि अस्ति। आर्थिक-विकासं, क्षेत्रीय-सम्पर्कं औद्योगिक-विकासं तथा जनकल्याणं वर्धयितुं संधारिताः एते प्रकल्पाः - समयसीमा, विभिन्न-संस्थानां समन्वयः तथा प्रलम्बित-विषयाणां शीघ्र-निवारणाय विशेष-ध्यानेन सह सन्ति समीक्षिताः।

**संविधान-हत्या-दिवस**

अद्य तावत् संविधान-हत्या-दिवसो वर्तते। दिवसोऽयं तस्याः घटनायाः स्मरणं कारयति, यदा पंचसप्तत्युत्तर- उनविंशतितमवर्षस्य जून मासस्य पंचविंशतिः दिनांके भारतीय संविधानस्य अवमानना कृता। अनेन सहैव, अयं दिवसः आपत्काले अत्याचारैः प्रताडितेभ्यः प्रत्येकं जनेभ्यः श्रद्धाञ्जलिम् अर्पयितुं दिवसो वर्तते।
अस्मिन्नेव दिने, तत्कालीनः राष्ट्रपतिः फखरुद्दीन अली अहमदः आन्तरिक-अशान्तेः कारणं प्रदर्श्य देशे 'राष्ट्रियापत्कालस्य' घोषणाम् अकरोत्।

**सीईओ दिल्ली**

देहल्यां अस्य मासस्य त्रिंशत् दिनाङ्कात् आरभ्यमाणस्य मतदातृ-सूचीनां 'विशेष-गहन-पुनरीक्षणस्य अन्तर्गतं 'गृहं-गृहं गत्वा गणना'' कार्यक्रमभिलक्ष्य, देहल्याः मुख्य-निर्वाचन-अधिकारिणा ह्यः नवदेहल्यां विभिन्न-राजनैतिक-दलानां प्रतिनिधिभिः सह एका सभा आहूता। मुख्य-निर्वाचन-अधिकारिणः एकेन विवरणेन स्पष्टीकृतं यत् अस्यां गोष्ठ्याम् भारतीय-जनता-पार्टीतिदलं (BJP), आम-आदमी-पार्टीति दलं (AAP), तथा भारतीय-राष्ट्रीय-काङ्ग्रेस (INC) इत्यादि-प्रमुखाणां राजनैतिक-दलानां प्रतिनिधयः समुपस्थिताः आसन्। कार्यालयानुसारं, मुख्य-निर्वाचनाधिकारी प्रत्यपादयत् यत् "कोऽपि योग्यः नागरिकः न वंचितः स्यात्, सहैव कोऽपि अयोग्यः जनः मतदातृ-सूच्यां न सम्मिलितो भवेत्।" अनेन सहैव, गणना-चरणे अनुपालनीयानां प्रमुखाणां गतिविधीनां विषये अपि राजनैतिक-दलानि विस्तरेण सूचितानि।

**ऋतु विज्ञान**

भारतीय-ऋतु-विज्ञान-विभागेन अद्य देशस्य उत्तर-पूर्वीय-क्षेत्रेषु, झारखण्ड, महाराष्ट्र, ओडिशा, उप-हिमालयी-पश्चिमबङ्ग, तेलंगाना, तटीय-कर्नाटक, कोङ्कणंसमेत्य गोवा क्षेत्रस्य कतिपयेषु भागेषु अति वृष्टेः पूर्वानुमानं प्रख्यापितम्। विभागानुसारं, अद्य पश्चिम-राजस्थान क्षेत्रे झञ्झावातस्य संभावनाऽपि वर्तते। अत्रावधेयं यत्, अद्य बिहार, पूर्व-मध्यप्रदेश पूर्व-उत्तरप्रदेशस्य च नानास्थानेषु उष्णतरंगस्यापि पूर्वानुमानं विभागेनानेन प्रकटितम्। अपरत्र, अद्य देहल्यां आंशिकरूपेण मेघाच्छादनं नभः भविष्यति, सहैव अपराह्णे सायङ्काले वा विद्युत्-गर्जनेन वृष्टेः सम्भावना वर्तते।

**□ईसीसी' महिला टी 20**

आईसीसी' महिला टी 20 विश्वकप स्पर्धायाम् अद्य भारतस्य सम्मुखीकरणं बांग्लादेशेन सह भविष्यति। स्पर्धेयं मैंचेस्टर-नगरस्य 'एमिरेट्स ओल्ड ट्रैफर्ड' (Emirates Old Trafford) क्रीडाङ्गणे आयोज्यते, या भारतीयसमयानुसारं सायङ्काले सप्तवादने आरप्स्यते। हरमनप्रीत कौरस्य नेतृत्वे भारतीय-महिला-दलं ('वुमेन इन ब्लू') सम्प्रति स्वसमूहे द्वितीयं स्थानं भजते।

**।।इति वार्ताः।।**